अपि त्रिलोक्या बहिरुल्लसन्ती तमो हरन्ती मुहुरान्तरं च ।
दिश्याद्दृशं नो विशदां जयन्ती मध्वस्य कीर्तिर्दिननाथदीप्तिम् ॥

अहरो दुरागमतमः स्वगोगणै
रकरोर्मुकुन्दगुणवृन्ददर्शनम् ।
अजयश्चतुर्दश जगन्ति सद्गुणैः
शरणं गुरो करुणयाऽपि नो भवेः ॥

नमस्ते प्राणेश प्रणतविभवायावनिमगा
नमः स्वामिन् रामप्रियतम हनूमन् गुरुगुण ।
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट भगवन्
नमः श्रीमन्मध्व प्रदिश सुदृशं नो जय जय ॥

श्रीमदानन्दतीर्थार्यपादाब्जं प्रणमाम्यमहम् ।
वृत्तिं मधुकृतां यत्र वहन्तीन्द्रादयः सुराः ॥

न माधवसमो देवो न च मध्वसमो गुरुः ।
न तद्वाक्यसमं शास्त्रं न च तस्य समः पुमान् ॥

यत्पूर्वं त्वमपूर्वसिन्धुमतर स्सद्वंद्यमध्वाचलात् ।
उद्यातः शतयोजनं परमदः शंसन्ति सन्तः क्षितौ ।
चित्रं जैत्रभवच्चरित्रमधुना यद्वेदवार्धिं तरन् ।
नित्यं कोटिसहस्रयोजनमपि त्वं राजवद्राजसे ॥

व्यासाय भवनाशाय श्रीशाय गुणराशये ।
हृद्याय शुद्ध विद्याय मध्वाय च नमो नमः ॥

जरासन्धांतको वीरो दुःशासनविनाशकः ।
पूर्णप्रज्ञो ज्ञानदाता मध्वो ध्वस्तदुरागमः ॥

तत्त्वज्ञो वैष्णवाचार्यो व्यासशिष्टो यतीश्वरः ।
आनन्दतीर्थः शंनामा जितवादी जितेन्द्रियः ॥

आनन्दतीर्थसन्नाम्नामेवं द्वादशकं जपेत् ।
लभते वैष्णवीं भक्तिं गुरुभक्तिसमन्विताम् ॥